International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 35-36
© 2026 IJMH
www.themultijournal.com
Received: 22-04-2026
Accepted: 04-05-2026
Publish : 06-05-2026

**Dr.Monojit Mukherjee**
Phd.From Jwaharlal Nehru-University, New Delhi

**Correspondence:**
**Dr.Monojit Mukherjee**
Phd.From Jwaharlal Nehru-University, New Delhi

# अद्वैतवेदान्तदिशा अनिर्वचनीयत्वप्रतिपादनम्

**Dr.Monojit Mukherjee**

## भूमिका

अद्वैतवेदान्ते अनिर्वचनीयत्वम् अज्ञानस्य एव लक्षणम्। अज्ञानस्य लक्षणं सन्दर्भे वेदान्तसारे उक्तम् अस्ति अज्ञानं तु सदसद्भ्यामनिर्वचनीयं, त्रिगुणात्मकं ज्ञानविरोधि:, भावरूपं यत्किञ्चिदिति[1]। तेषु इत्येतेषु अनिर्वचनीयम् एकम्। अनिर्वचनीयस्य लक्षणसन्दर्भे उच्यते सदसद्विलक्षणं अर्थात् अज्ञानं सद् न, असदपि न इति, तदर्थं इदं अनिर्वचनीयम्[2] इति आख्यायते । अज्ञानस्य आश्रयः विषयः च ब्रह्म इति [3]। यदा ज्ञानं जायते तदा अज्ञानं अपि नश्यते, तेन सह जरा, बन्धः, दुःख, क्लेशः इत्यादिभ्यः जीवाः मुच्यन्ते।

ब्रह्मणि नेत्रेन्द्रियं गन्तुं नैव शक्नोति, यतो हि तस्मिन् गति न सम्भवति । ब्रह्म शब्दानां इन्द्रियाणां च आत्मा, यथा अग्नि दाहकः, प्रकाशकः सन् अग्निना, अग्नि न प्रकाश्यते, मनसा मनः न सङ्कल्पते, निश्चीयते च । यतो हि ब्रह्म मनसः आत्मा । इन्द्रियै मनसा च वस्तुज्ञानं सम्भवति । ब्रह्म निर्विषयकत्वात् ब्रह्म विषयः न ।

**विषय:**

अज्ञानं अनिर्वचनीयं इति कथ्यते, अर्थात् न सत्, न असत् इति अपि च न सदसत् इति। अज्ञानं सद्रूपं चेत् ब्रह्म न बाध्यते परन्तु अज्ञानस्य बाधः आत्मज्ञानेन न भवति । यदि अज्ञानं असत् इति आख्यायते तर्हि अज्ञानं न प्रतीयते परन्तु अहमज्ञः इत्यादिरूपेण प्रतीयते। अतः अज्ञानं सदसद्विलक्षणं अनिर्वचनीयम् इति[4]। नृसिंहसरस्वतीभिः उच्यते यत् अज्ञानं सद्रूपं अङ्गीक्रियते चेत् अस्य कारणस्य अनुपपत्तिः भवति, अज्ञानं असद्रूपं अङ्गीक्रियते[5] चेत् शशविषाणवत् तुच्छम् इति अङ्गीकर्त्तव्यम् परन्तु अज्ञानं सदसद् विलक्षणं अज्ञानस्य न साङ्गम् अस्ति, न अङ्गरहितम् भवति, न उभयरूपं भवति[6] ।

विद्यारण्यमुनिभिः कथ्यते यत् माया परमेश्वरस्य सैव शक्तिः येन विवर्त्तरूपेण जगत् सृज्यते । यथा- मृद् घटः न परन्तु कुलालप्रयत्नेन घटः निर्मीयते । परन्तु घटः मृदः न भिन्नं न अभिन्नं तदर्थं घटः अनिर्वचनीयं इथं जगत् निर्माणार्थं इयं शक्ति साश्रयात् न भिन्नं न अभिन्नम् । अतः विलक्षणात् अनिर्वचनीयम् इति कथ्यते[7]।

पुनः केनोपनिषदि उच्यते यत् ब्रह्मपर्यन्तं नेन्द्रियाणि गच्छन्ति, न वाणी गच्छति, न मनः गच्छति। ब्रह्म विदितादपि परं अविदितादपि परम्[8]।

पुनः केनोपनिषदि आलोच्यते यत् यदा मनुष्याणां ज्ञानं जायते तदा किञ्चिद् ज्ञानं तु ब्रह्मसन्दर्भे जायते, अस्य यद्रूपं मनुष्यै ज्ञायते तत्तु देवैःविद्यते, अतः तदेव ब्रह्मज्ञानं अल्पं इति कथ्यते, अतः मनुष्याणां कृते ब्रह्म विचारणीं इति कथ्यते। तदा शिष्येन उच्यते, तेन तु ब्रह्म ज्ञायते[9] ।

पुनः माण्डुक्योपनिषदि आत्मानः अनिर्वचनीयत्वस्य सन्दर्भे उच्यते, आत्मनि नित्य - अनित्य इत्येतेषां प्रवृत्ति नास्ति। यत्र शब्दः नास्ति तत्र नित्य – अनित्य इति विवेकः अपि आत्मनि नास्ति[10] । पुनः माण्डुक्योपनिषदि आलोच्यते यथा स्वप्ने चित्तं मायया द्वैतरूपेण आभास्यते, तथैव जाग्रत्कालीनसमये चित्तं मायया आभास्यते ।।[11]

पुनः माण्डुक्योपनिषदि उच्यते, स्वप्ने अद्वयचित्तं एवं द्वैतरूपेण आभास्यते, इथं जाग्रत्काले अद्वयमनः द्वैतरूपेण आभास्यते, इत्स्यस्मिन् विषये नापि कोऽपि सन्देह वर्त्तते [12]।

**उपसंहारः**

अयमेव सिद्धान्तः आयाति यत् अनिर्वचनीयत्वस्य प्रसङ्गः ब्रह्म, ब्रह्मणः अज्ञानं इति सर्वस्मिन् विषये आगच्छति। अज्ञानं तु सद् न असदपि नन सदसद्। ब्रह्म न विदितादपि परं अविदितापि परं अर्थात् अनिर्वचनीयम्। आत्मनि अपि नित्य-अनित्य इति विवेकः अपि नास्ति अर्थात् अयं स्पष्टोऽस्ति यत् अज्ञानं कारणरूपं न अज्ञानं कार्यजगतात् न भिन्नं न अभिन्नं, अतः भिन्नाभिन्नविलक्षणम्।

अनिर्वचनीयसिद्धार्थम् उपनिषत्सु नेति नेति इति शब्दः प्रयुज्यते। नेति नेति इति शब्देन ब्रह्म न अपितु जगत् निषिद्धयते । यद् वस्तु ईन्द्रियाणां विषय भवति, तेषां जाति, गुण, किया, इति विशेषणैः अन्यः उपदिश्यते । परन्तु ब्रह्म तेषु विशेषणेषु न अन्यतमम्। य ब्रह्म ज्ञायते तेन विना अन्यः कोऽपि नास्ति, येन विना ब्रह्म ज्ञेय भवितुं शक्नोति। अतः केनापि उपदेशेन ब्रह्मणः प्रतीतिः नितराम् क्लिश्टकरा। इथं हेयोपादेयविपरीत स्वात्मा ब्रह्म इति सिद्धान्तः।

**ग्रन्थसूची**

- अद्वैतवेदान्तः. राजधानीग्रन्थमाला, जोधपुर, 2011 ।
- अद्वैतसिद्धिः मधुसूदनसरस्वतीप्रणीता चौखम्बा संस्कृत सीरिज, वाराणसी, 2011
- ईशादि नौ उपनिषद्, गीताप्रेस गोरखपुर, 2012
- छान्दोग्योपनिषद् गीताप्रेस गोरखपुर, 2015
- जैमिनीयन्यायमाला. माधवाचार्यप्रणीता चौखम्बा सुरभारती प्रकाशनम्,वाराणसी, 2013
- तर्कसङ्ग्रहः, अन्नंभट्टप्रणीतः चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 2013
- बृहदारण्यकोपनिषद् गीताप्रेस गोरखपुर, 2013
- ब्रह्मसूत्रशाङ्करभाष्यभामतीव्याख्या वाचस्पतिमिश्रकृता, मोतिलाल वणारसी दास, नवदेहली, 2009
- ब्रह्मसूत्रशाङ्करभाष्यरत्नप्रभाटीका. गोविन्दानन्दकृता भारतीय बुक कर्पोरेशन, नवदेहली, 2010
- श्रीमद्भगवद्गीता गीताप्रेस गोरखपुर, 2002
- सांख्यतत्त्वकौमुदी, वाचस्पतिमिश्रप्रणीता चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2012
- सिद्धान्तलेशसङ्ग्रहः, अप्पयदीक्षितकृत, चौखम्बासंस्कृत-संस्थानम्, वाराणसी, 1937

**आंग्लो ग्रन्थाः**

Ananda Lahari by Sankaracharya. Sharada Sanskrit Sansthan, Varanasi, 2008

Atmabodha by Sankaracharya. Ramakrishana Matha, Chennai, 1947

Brahmasutra Sankarbhasya bhamti commentary by Bachaspati Mishra. Sanskrit
Pustak Bhandar, Kolkatta, 1973

The Brahmasutra and their principal commentary by V.M Apte. Munshiram
Manoharlal, pvt. Ltd, 2001

Mundakya Upanishad. Udbodhan Karyalaya, Kolkata, 2013

The Manduka Upanishad with Gaudapadas Karika and Sankara Commentry.
Advaita Ashram, Almora, 2001

Upanishads. F. Max Muellar. Prakash Books India Pvt. Ltd., Delhi 2001

Vedanta Darshan by Vyasadeva. Gita press, Gorakhpur, 2013

Vedantaparibhasha by Dharmaraja Adhvarindra Choukhamba Sanskrit series,
Varanasi, 1990

Vivek Chudamani By Sankaracharya. Gita press, Gorakhpur, 2015

**सन्दर्भ ग्रन्थः**

1 वेदान्तसारः ६

2 विवेकचूडामणिः ११०

3 'आश्रयत्व विषयत्वभागिनी निर्विभागा चितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः॥
सोपशारीरिक १/३/१९.

4 'सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्प्यनङ्प्युभयात्मिका नो महाद्भूतानिर्वचनीयरूपा'॥
विवेकचुडामणिः १११

5 वेदान्तसारः, विद्वन्मनोरञ्जिनी, पृ. ८६

6 वेदान्तसारः, विद्वन्मनोरञ्जिनी, पृ. ८७

7 देवात्मशक्तिं स्वगुणैर्निगुढाम्। श्वेताश्वतरोपनिषद १/३

8 न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्यो न विजानीमो यथैतदनुशिष्यादन्यदेव तद्विदितादर्थो अविदितादधि। इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे। केनोपनिषद् १/१/३

9 यदि मन्यसे सूवेदेति दहरमेवापि नूनम्। त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम्।
केनोपनिषद् २/२/१

10 'नाजेषु सर्वधर्मेषु शाश्वताशाश्वताभिधा ।
यत्र वर्णा न वर्त्तन्ते विवेकस्तत्र नोच्यते ॥ माण्डुक्योपनिषद् ४/६०

11 'यथा स्वप्ने दयाभासं चित्तं चलति मायया।
तथा जाग्रद्याभासं चित्तं चलति मायया । माण्टुक्योपनिषद ४/६१

12 'अद्वयं च द्वयाभासं चित्तं स्वप्ने न संशयः।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः'॥ माण्डूक्योपनिषद् ४/६२

**कोशग्रन्थाः**

- अमरकोशः अमरसिंहकृतः निर्णय सागर प्रेस बम्बई,
- वाचस्पत्यम्, चौखम्बासंस्कृतग्रन्थमाला, वाराणसी, 1968, 1961
- Encyclopaedia of Indian philosophy by Karl H. Potter, Motilal Banarasi Das, Delhi, 1970
- English-Sanskrit dictionary by Monier William. Munshiram Manoharlal Das, Delhi, 1976.

**E Sources-**

www.google.com
www.indiacat.in
www.jnu.ac.in
www.worldcat.in